2026
Sanskrit Sahitya
UGSSDE 605
नाट्यसाहित्यम् - २
Full Marks : 60
Time : $2\frac{1}{2}$ hours

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् – 1×10=10

1. नाटकेषु रम्यं किमस्ति ?
2. शकुन्तलायाः धर्मपिता कः अस्ति ?
3. अभिज्ञानशाकुन्तलस्य का नायिका ?
4. अभिज्ञानशाकुन्तले कति अंकाः सन्ति ?
5. प्रियंवदा कस्याः सहचरी अस्ति ?
6. अभिज्ञानशाकुन्तलस्य सर्वोत्तमः अंकः कः ?
7. अभिज्ञानशाकुन्तलस्य उपजीव्यं किमस्ति ?
8. वेणीसंहारनाटकः केन प्रणीतः ?
9. वेणीसंहारनाटकस्य मुख्यरसः कः ?
10. वेणीसंहारनाटके कति अङ्काः सन्ति ?

अधस्तनेषु पञ्चानां व्याख्या विधेया – 6×5=30

11. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
    ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
    यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
    प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥
12. जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
    पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि ॥
13. मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् । भावार्थः लेखनीयः ।

14. अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिगृहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

15. पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रिय मण्डनापि भवतां स्नेहेन या पल्लवम्।

16. सत्पक्षा मधुगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवंशान्मेदिनीपृष्ठे ॥

17. महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहुः।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः ॥

अधस्तनेषु द्वौ प्रश्नौ समाधेयौ 10×2=20

18. अभिज्ञानशाकुन्तलमिति नाटकस्य प्रथमाङ्कस्य
कथावस्तु समासेन आलोच्यताम्।

19. अभिज्ञानशाकुन्तलनाटकस्य चतुर्थाऽङ्कस्य वैशिष्ट्यम्
आलोच्यताम्।

20. वेणीसंहारनाटकस्य कथावस्तु संक्षेपेण लिख्यताम्।

21. वेणीसंहारस्य तृतीयाङ्कः कवेर्नाट्यकलाया उत्कृष्टं
निदर्शनमस्ति – इति विवेच्यताम्।

****